RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484
सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥
त्वमेव चातकाधार इति केषां न गोचरः। किमम्भोद वदास्माकं कार्पण्योक्ति प्रतीक्षसे ॥ 50 ॥
रेरे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैकादृशाः। केचिद्वृष्टिभिरार्द्रयन्ति धरणीं गजन्ति केचिद्वृथा यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥51॥
(नीतिशतकम्)

॥ ओ३म् ॥
अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ 52 ॥
दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन्।
मणिना भूषितः सपः किमसौ न भयकरः ॥ 53 ॥
(नीतिशतकम्)

卐 वर्षम्-९ 卐 अंकः-१२ (२०४) 卐 १६ दिसम्बरः २०१९ तः ३१ दिसम्बरमासः २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७६ 卐 सृष्टिसंवत्-१,९६,०८,५३,११७ 卐 पृष्ठम्-८

## महीशूर(मैसूर)नगरे अन्ताराष्ट्रियप्राकृतसमावेशः

मैसूरवि.वि.-कन्नडवि.वि.,हम्पी-साहित्याकादमी-श्रवणबेलगोलास्थान्ताराष्ट्रिय-प्राकृताध्ययनशोधकेन्द्राणां संयुक्ततत्त्वावधाने मैसूर विश्वविद्यालये12-13.12.019



प्रो.जयकुमार उपाध्ये -डा.रमाकान्तशुक्लौ स्वस्तिश्रीचारुकीर्तिभट्टारकेभ्यःपद्यप्रसूनाञ्जलिं समर्पयत(12.12.2019

दिनाङ्कयोःअन्तराष्टिय-प्राकृतसमावेशस्यायोजनमभूद्यत्र पञ्चसत्रेषु पञ्चविंशतिप्रायैर्विद्वद्भिर्विचारा

शेषभागःद्वितीयपुटे

## देववाणीपरिषदश्चतुश्चत्वारिंशः स्थापनादिवस–समारोहः

मैसूर नगरे। 'देववाणीपरिषद्,दिल्ली' ति संस्थायाश्चतुश्चत्वारिंशः स्थापनादिवस-समारोहो महीशूरपरे(मैसूर नगरे) मानसगंगोर्त्याअतिथिभवनसभागारे 13.12.2019तमे दिनाङ्के सोत्साहं सम्मानितोह्यभूत्।

अस्मिन्नवसरे परिषदस्त्रैमासिकपत्रिकाया 'अर्वाचीनसंस्कृतम्' इत्यस्या ऐषमः प्रकाशिताः




सर्वेह्यप्यङ्का उपस्थितेभ्यो विद्वद्भ्यो मुख्यातिथिना प्रसिद्धसाहित्यकारेण श्रीमता हंपनामहाभागेन समर्पिताः। तेनोक्तं यद् देववाणीपरिषदा पत्रिकायास्सततप्रकाशनेन किञ्च सार्धशतप्रायाणां ग्रन्थानां प्रकाशनेन संस्कृतसाहित्यस्य महती सपर्या विहिता। समारोहस्य स्वागताध्यक्षेण कार्यक्रमसञ्चालकेन च आचार्यजयकुमाउपाध्येमहाभागेन परिषदः कार्यकलापानां परिचयदानपुरस्सरं देववाणीपरिषदः किञ्च

शेषभागःद्वितीयपुटे

# वैदिकी ज्ञानसम्पदा नारी चः समसामयिकं परिप्रेक्ष्यम्

## [बृहत्तर-वैदिक-अध्ययन-परिषदा समायोजितं त्रयोविंशतितम-राष्टियसम्मेलनस्य प्रतिवेदनम]

**-डॉ. रणजित बेहेरा**
*सचिवः (शैक्षणिकः), बृहत्तर-वैदिक-अध्ययन-परिषद् (WAVES)*
*(एसोसिएट प्रोफेसर, संस्कृतविभागः, दिल्ली-विश्वविद्यालयः)*

'वैदिकी ज्ञानसम्पदा नारी चः समसामयिकं परिप्रेक्ष्यम्' इति विषयमवलम्ब्य बृहत्तर-वैदिक-अध्ययन-परिषद्(WAVES) तथानारी-संवाद-प्रकल्प, इन्दिरा-गान्धी-राष्ट्रीय-कलाकेन्द्रम्, नवदेहली इत्यनयोः संस्थानयोः संयुक्ततत्त्वावधानेन त्रयोविंशतितम-त्रिदिवसीय-राष्ट्रियसम्मेलनं 5.12.2019 तः 7.12.2019 यावत् नवदेहलीस्थ-इन्दिरा-गान्धी-राष्ट्रीय-कलाकेन्द्रस्य



सभागारेसाफल्येनसमायोजितम्।

नवदशोत्तर-द्विसहस्त्रतमवर्षस्य दिसम्बरमासस्य पञ्चमदिनांके प्रातः वैदिकविद्वद्भिः अतिथिभिश्च दीपप्रज्ज्वालनेन सम्मेलनमेनत्प्रारब्धम्। श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठस्य तथा कमला-नेहरू-महाविद्यालयस्य छात्रैः वैदिकमंगलाचरणं लौकिकमंगलाचरणं विहितम्। आदौ सचिवेन डॉ. रणजितबेहेरावर्येण विगत-विंशति-वर्षेभ्यः समायोजितानां सम्मेलनानां सामान्यपरिचयः प्रदत्तः। 'वाइडरएसोसिएशनफार्वैदिकस्टडीज'(WAVES) इत्यस्याः संस्थायाः अध्यक्षा प्रो. शशितिवारीमहोदया सम्मेलनविषयोपस्थापनेन साकमेव समेषामतिथीनां विदुषां प्रतिभागीनाञ्च स्वागतं व्यदधात्। इन्दिरा-गान्धी-राष्ट्रीय-कलाकेन्द्रस्य सदस्य-सचिवेन डॉ. सच्चिदानन्दजोशीवर्येण उद्घाटनभाषणावसरेउदीरितं यत् सम्मेलनविषयोऽसौ साम्प्रतिके समाजे महत्त्वपूर्णः समसामयिकश्च वर्तते। मुख्यातिथिपदमलंकुर्वताराष्ट्रिय-संस्कृत-संस्थानस्यकुलपतिनाप्रो. परमेश्वरनारायण-शास्त्रिमहोदयेनोक्तंयत्श्री-श्रद्धा-सरस्वती-वाक्-प्रभृतिषु सूक्तेषु परोक्षरूपेण नारीणां चर्चोपलभ्यते। शतपथब्राह्मणदृशा मनुष्यजीवनस्य पूर्णता पत्न्या एव भवतीति।

शेषभागः अष्ठमपुटे

## श्रीरामभद्राचार्यविकलांविश्वविद्यालये एकदिवसीयः परिसंवादः समायोजितः

चित्रकूट। 01/12/19 दिनांके चित्रकूटे साहित्य-अकादमी- श्रीरामभद्राचार्यविकलांविश्वविद्यालये एकदिवसीयः परिसंवादः समायोजितः। तत्रत्यो विषय आसीत् संस्कृतसाहित्ये चित्रकूटः । अनेके विद्वासः स्वविचारानश्रावयन्। बहुभिः शोधपत्राणि पठितानि। महाकविः अभिराजराजेन्द्रमिश्रः, प्रो, प्रभुनाथद्विवेदी, प्रो, रहसबिहारीद्विवेदी, डॉ. राजेन्द्रत्रिपाठी, डॉ. अरविन्दतिवारी, डॉ. अर्चना जोशी , श्रीमद्दयान्दमहोदयश्चान्ये बहवो विद्वांस उपस्थिता अभूवन्। माननीयैः कुलपतिवरैः डॉ.प्रो. योगेळदुबेमहोदयैः स्वविचारेण सर्वानमेहयन्। प्रो, अभिराजमहोदयैरतीव दिव्यमुद्बोदधनमकारि।



प्रथमपुटस्य शेषभागः

# वैदिकी ज्ञानसम्पदा नारी चः समसामयिकं परिप्रेक्ष्यम्

अमेरिकातः समागतः प्रो. बी. एन. नरहरिआचार्यमहोदयोऽवोचत् यत् सर्वासां समस्यानां समाधानं वेदेष्येव सम्प्राप्यते। बेल्जियमदेशात् समागतेन डॉ. कोएनराडएल्स्टवर्येण प्रतिपादितं यत् पाश्चात्यमीडिया भारतस्य कुरीतीः अधिकं प्रसारयति। सम्मेलनस्यास्योद्घाटनसत्रस्य मुख्यवक्ता आसीत् उत्तराखण्डस्थ-राष्ट्रिय-संस्कृत-संस्थान-रघुनाथकीर्ति-परिसरस्य प्राचार्याः प्रो. के. बी. सुब्बराय्यडुवर्यः। तेनोक्तं यत् वेदानां माहात्म्यं सर्वदैव विद्यत इति। वैदिकसंस्कृतिः सर्वासां संस्कृतीनां मूलभूतैव। विवादाय संवादः आवश्यकः। वादे





साफल्येन सञ्चालितम्।

त्रिवसीय-राष्ट्रियसम्मेलनेऽस्मिन्भारतस्यविभिन्नेभ्यःप्रदेशेभ्यः तथाविदेशेभ्यः140विद्वांसःभागंगृहीतवन्तः। विविधेभ्यः विश्वविद्यालयेभ्यः विविधाभ्यः संस्थाभ्यश्च अध्यापकाः युव-शोधार्थिनश्च भागमवहन्, तद्यथा - दिल्ली-विश्वविद्यालयः, दिल्ली; जवाहरलाल-नेहरू-विश्वविद्यालयः, दिल्ली; अलीगढ़-मुस्लिम-विश्वविद्यालयः, अलीगढम्; इलाहाबाद-विश्वविद्यालयः, प्रयागराजः; इन्दिरा-गान्धी-राष्ट्रीय-कलाकेन्द्रम्, दिल्ली; भारतीय-विद्याभवनम्, दिल्ली; गोवाहाटी-विश्वविद्यालयः, गोवाहाटी; पञ्जाब-विश्वविद्यालयः, होशियारपुरम्; नागपुर-विश्वविद्यालयः, नागपुरम्; उत्तराखण्ड-सस्कृत-विश्वविद्यालयः, हरिद्वारम्; श्री लालबहादुरशास्त्रि-संस्कृत-विद्यापीठम्, दिल्ली; रवीन्द्र-भारती-विश्वविद्यालयः, कोलकाता; राष्ट्रिय-संस्कृत-संस्थानम्, दिल्ली; वनस्थली-विद्यापीठम्, राजस्थानम्; श्री शंकराचार्य-संस्कृत-विश्वविद्यालयः, केरलम्; मेम्फिसिस-विश्वविद्यालयः, यूएसए प्रभृतयः।

सम्मेलनेऽस्मिन् त्रयोदश-शैक्षिक-सत्राणि समायोजितानि। शैक्षिकसत्रेषु पूर्णसत्रत्रयमवर्तत। पूर्णसत्रस्य प्रमुखवक्तारः तेषां विषयाश्चेमे सन्ति -

1. डॉ. भक्तिनिष्कामशान्ता, सचिवः, श्री चैतन्य-सारस्वत-संस्था, बैंगलोरम, कर्णाटकम् (विषयः - - In VaicGava Conception the Ultimate SpiritualGoal is to get engaged in the Service of theHighest, Negative (Feminine) Potency)

2. प्रो. मदनलालगोयलः, वेस्ट-फ्लोरिडा-विश्वविद्यालयः, फ्लोरिडा, यूएसए (विषयः - Democracy in India, Vedic Political Thought andFemale Participation)

3. प्रो. बी. एन. नरहरिअचारः, मेम्फिसिस-विश्वविद्यालयः, यूएसए (विषयः - Vrsakapisukta (RV X.86): Indrani, her role asRsika, Wife and a Mother)

4. डॉ. नीरा मिश्रा, अध्यक्षा, द्रौपदी ड्रीम ट्रस्ट, दिल्ली (विषयः - Devi Draupadi: The Exemplar of eternal VedicLiberalism and Gender Parity)

5. डॉ. मधुशर्मा, ड्यूक-विश्वविद्यालयः, यूएसए (विषयः –Gayatri Mantra – The Feminine Shakti)

6. प्रो. शशिबाला, संकायाध्यक्षा, भारतीय-विद्याभवनम्, दिल्ली (विषयः –Divine Manifestations of Shakti Tattva)

7.डॉ. सुषमाजटू, निदेशिका, नारी-संवाद-प्रकल्पः, इन्दिरा-गान्धी-राष्ट्रीय-कला-केन्द्रम्, दिल्ली (विषयः –The Sacred River Vitasta : An Embodiment of Goddess Uma)

बृहत्तर-वैदिक-अध्ययन-परिषदा समायोजितायां सांस्कृतिकसन्ध्यायां सुश्री संस्कृतिचौधुरी भारतनाट्यम् (देवीस्तुतिः), सुश्री चञ्चलः ओडिशीनृत्यं (दशावतारः) एवंडॉ. सुप्रिया संजू कथकनृत्यञ्च (सुधाकथकम्) प्रदर्शितवत्यः। वैदिकज्ञानपिपासवः समे नृत्यप्रदर्शनमिदं भृशमभिनन्दितवन्तः।

सम्मेलन-समापनसमारोहेऽध्यक्षपदं निर्व्यूढवान् रवीन्द्रभारती-विश्वविद्यालयस्य वैदिकाध्ययनकेन्द्रस्य निदेशकः प्रो. भास्करानाथभट्टाचार्यवर्यः। कार्यक्रम-सहसंयोजिका डॉ. सुषमाजटूमहोदया सर्वेषामतिथीनां परिचयपूर्वकं स्वागतं कृतवती। मुख्यातिथिपदमलंकुर्वता दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षेन प्रो. रमेशचन्द्रभारद्वाजमहोदयेन संगोष्ठीविषयः प्रशंसितस्तथा शोधकार्येषु मौलिकचिन्तनाय शोधार्थिनः प्रेरिताः। पुनश्च तेन भणितं यत्कथं पाश्चात्याः सुनियोजिततया शैक्षिकदृशा भारतीयपरम्परायाः स्वोद्देश्यानुकूलं दूषणे खण्डने च रतास्सन्ति। एतदर्थं वयं सर्वे सम्भूय प्रत्युत्तरं दद्याम। विशिष्टातिथिपदमलङ्कुर्वता प्रो. मदनलालगोयलमहोदयेनोक्तं यत् विदेशेषु विविधसंस्कृतीनां स्वरूपं संस्थाप्य तासु हिन्दूसंस्कृतेः यद्वैशिष्ट्यं वर्तते तस्य प्रतिपादनानन्तरं पाश्चात्याः विभिन्नधर्मावलम्बिनः भारतीयसंस्कृतिं हिन्दूसंस्कृतिं प्रति वा समाकृष्टाः भवन्ति।

सारस्वतातिथिपदमलङ्कुर्वता ब्रिगेडियर-जे.एस.राजपुरोहितवर्येण निगदितं यत् गुरवः, निर्णयनिर्मातारः अनुगामिनश्चेत्येभिस्तत्त्वैरेव किमपि लक्ष्यमुद्देश्यं वा सम्पूर्णतां याति। अवसरेऽस्मिन् डॉ. गणेशदत्तशर्मणा विरचितं 'वेदों में वायुयान-जलयान तथा युद्ध व शस्त्रास्त्र विद्या' इत्याख्यं पुस्तकं तथा च प्रो. लल्लनप्रसादवर्येण विलिखितं 'पाञ्चाली स्वयंवर से चीरहरण तक' इत्याख्यं पुस्तकञ्च समुपस्थितैरतिथिः लोकायार्पितम्।

वर्षेऽस्मिन् स्वर्गीय-श्रीमतीसुलोचना-एम.गोयल-स्मृतिपुरस्कारः - 2019 युवशोधार्थिषु उत्कृष्टशोधपत्रप्रस्तुतये समुद्घोषितः। एतदर्थं 10000/- रूप्यकाणि प्रो. मदनलालगोयलमहोदयेन समर्पितानि। डॉ. मीरा द्विवेदी, दिल्ली-विश्वविद्यालयः, डॉ. देवेन्द्रप्रसादमिश्रः, श्री लालबहादूरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्, डॉ. प्रतिभाशुक्ला, उत्तराखण्ड-संस्कृतविश्वविद्यालयः इति त्रयाणां सदस्यानां निर्णेतर्दिलमेकं प्रकल्पितम्। तत्र युवशोधार्थिषु पञ्च शोधार्थिनां शोधपत्राणि पुरस्काराय चितानि। समापनसत्रे इमे शोधार्थिनः युवशोधार्थिपुरस्कारेण सम्मानिताः।

प्रथमपुरस्कारः -डॉ. हरिकृष्णशर्मा के. एन., सहायकाचार्यः, संस्कृत-विभागः, श्री शंकरमहाविद्यालयः, कालाडी, केरलम्।

द्वितीयपुरस्कारः -श्री कौस्तुभगौडः, दिल्ली एवं श्री अभिषेकपराशरः, आर्यभट्टमहाविद्यालयः, दिल्ली-विश्वविद्यालयः, दिल्ली।

तृतीयपुरस्कारः -सुश्री प्रियंका रस्तोगी, शोधच्छात्रा, वनस्थली-विद्यापीठम्, राजस्थानम्।

प्रोत्साहनपुरस्कारौ -1. सुश्री प्रज्ञा घोषः, शोधच्छात्रा, दर्शनविभागः, दिल्ली-विश्वविद्यालय।

2. सुश्री मधुस्मिता डेका, शोधच्छात्रा, वेदविभागः
श्री लालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली।

समापनसत्रस्यास्य आध्यक्षपदमलङ्कृतवान् रवीन्द्रभारती-विश्वविद्यालयस्य वैदिकविद्वान् प्रो. भास्करानाथभट्टाचार्यवर्यः। तेनोक्तं यत् वैदिकसंस्काराः विदेशेष्वप्याद्रियन्ते। वैदिकवाङ्मयाध्ययनक्रमे उदात्तादिस्वराणां भूमिका महत्तरैव। वेदमन्त्राणां समुचितज्ञानाय स्वरदृष्ट्याऽध्ययनं विधातव्यम्। 'वेव्स' इत्यस्याः संथायाः अध्यक्षया प्रो. शशितिवारीमहोदयया महत्शैक्षिकसमारोहेऽस्मिन् समुपस्थितानामभ्यागतविदुषामतिथीनां, शोधपत्रप्रोस्तोतर्णिां, वेव्ससदस्यानां, कार्यकर्तर्णिां इन्दिरा-गान्धी-राष्ट्रीयकलाकेन्द्रस्य च सहयोगाय योगदानाय च धन्यवादवचांसि व्याहृतानि। समापनसत्रमेनत् वेव्स-सचिवमहोदयया डॉ. अपर्णाधीरखण्डेलवालद्वारा सोल्लासं सञ्चालितम्। शान्तिपाठेन सम्मेलनमिदं समाप्तिमधिगतम्।


# उत्तरप्रदेश संस्कृत संस्थान, लखनऊ

(भाषा विभाग, उत्तरप्रदेश शासन के अधीन)

कक्ष संख्या 523, पंचम तल, इंदिरा भवन, हजरतगंज, लखनऊ – 226001
Ph.: 96487 01206, 70070 45360. ■ e-mail : upsanskritsansthanam@yahoo.com
■ website : www.upsanskritsansthanam.in

## सूचना

**सूचित किया जाता है कि उ.प्र. संस्कृत संस्थान द्वारा वित्तीय वर्ष 2019-20 हेतु संचालित छात्रवृत्ति योजना के अन्तर्गत माध्यमिक संस्कृत शिक्षा परिषद् से मान्यता प्राप्त विद्यालयों के छात्रों से ऑनलाईन एवं ऑफलाईन माध्यम से आवेदन पत्र प्रपूरित किये जाने की अन्तिम तिथि दिनांक 15-12-2019 से बढ़ाकर 31-12-2019 तक की जाती है।**

**- निदेशक**



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।